# ॥ वाल्मीकि रामायण ॥

## ४ किष्किन्धाकाण्ड

### अध्याय ४०

ततः प्रस्थाप्य सुग्रीवस्तन्महद्वानरं बलम् ।
दक्षिणां प्रेषयामास वानरानभिलक्षितान् ॥ १॥

नीलमग्निसुतं चैव हनुमन्तं च वानरम् ।
पितामहसुतं चैव जाम्बवन्तं महाकपिम् ॥ २॥

सुहोत्रं च शरीरं च शरगुल्मं तथैव च ।
गजं गवाक्षं गवयं सुषेणमृषभं तथा ॥ ३॥

मैन्दं च द्विविदं चैव विजयं गन्धमादनम् ।
उल्कामुखमसङ्गं च हुताशन सुतावुभौ ॥ ४॥

अङ्गदप्रमुखान्वीरान्वीरः कपिगणेश्वरः ।
वेगविक्रमसम्पन्नान्सन्दिदेश विशेषवित् ॥ ५॥

तेषामग्रेषरं चैव महद्बलमसङ्गगम् ।
विधाय हरिवीराणामादिशद्दक्षिणां दिशम् ॥ ६॥

ये के चन समुद्देशास्तस्यां दिशि सुदुर्गमाः ।
कपीशः कपिमुख्यानां स तेषां तानुदाहरत् ॥ ७॥

सहस्रशिरसं विन्ध्यं नानाद्रुमलतावृतम् ।
नर्मदां च नदीं दुर्गां महोरगनिषेविताम् ॥ ८॥

ततो गोदावरीं रम्यां कृष्णावेणीं महानदीम् ।
वरदां च महाभागां महोरगनिषेविताम् ॥ ९॥

मेखलानुत्कलांश्चैव दशार्णनगराण्यपि ।
अवन्तीमभ्रवन्तीं च सर्वमेवानुपश्यत ॥ १०॥

विदर्भानृषिकांश्चैव रम्यान्माहिषकानपि ।
तथा बङ्गान्कलिङ्गांश्च कौशिकांश्च समन्ततः ॥ ११॥

अन्वीक्ष्य दण्डकारण्यं सपर्वतनदीगुहम् ।
नदीं गोदावरीं चैव सर्वमेवानुपश्यत ॥ १२॥

तथैवान्ध्रांश्च पुण्ड्रांश्च चोलान्पाण्ड्यान्सकेरलान् ।
अयोमुखश्च गन्तव्यः पर्वतो धातुमण्डितः ॥ १३॥

विचित्रशिखरः श्रीमांश्चित्रपुष्पितकाननः ।
सचन्दनवनोद्देशो मार्गितव्यो महागिरिः ॥ १४॥

ततस्तामापगां दिव्यां प्रसन्नसलिलां शिवाम् ।
तत्र द्रक्ष्यथ कावेरीं विहृतामप्सरोगणैः ॥ १५॥

तस्यासीनं नगस्याग्रे मलयस्य महौजसं ।
द्रक्ष्यथादित्यसङ्काशमगस्त्यमृषिसत्तमम् ॥ १६॥

ततस्तेनाभ्यनुज्ञाताः प्रसन्नेन महात्मना ।
ताम्रपर्णीं ग्राहजुष्टां तरिष्यथ महानदीम् ॥ १७॥

सा चन्दनवनैर्दिव्यैः प्रच्छन्ना द्वीप शालिनी ।
कान्तेव युवतिः कान्तं समुद्रमवगाहते ॥ १८॥

ततो हेममयं दिव्यं मुक्तामणिविभूषितम् ।
युक्तं कवाटं पाण्ड्यानां गता द्रक्ष्यथ वानराः ॥ १९॥

ततः समुद्रमासाद्य सम्प्रधार्यार्थनिश्चयम् ।
अगस्त्येनान्तरे तत्र सागरे विनिवेशितः ॥ २०॥

चित्रनानानगः श्रीमान्महेन्द्रः पर्वतोत्तमः ।
जातरूपमयः श्रीमानवगाढो महार्णवम् ॥ २१॥

नानाविधैर्नगैः फुल्लैर्लताभिश्चोपशोभितम् ।
देवर्षियक्षप्रवरैरप्सरोभिश् च सेवितम् ॥ २२॥

सिद्धचारणसङ्घैश्च प्रकीर्णं सुमनोहरम् ।
तमुपैति सहस्राक्षः सदा पर्वसु पर्वसु ॥ २३॥

द्वीपस्तस्यापरे पारे शतयोजनमायतः ।
अगम्यो मानुषैर्दीप्तस्तं मार्गध्वं समन्ततः ।
तत्र सर्वात्मना सीता मार्गितव्या विशेषतः ॥ २४॥

स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः ।
राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ॥ २५॥

दक्षिणस्य समुद्रस्य मध्ये तस्य तु राक्षसी ।
अङ्गारकेति विख्याता छायामाक्षिप्य भोजिनी ॥ २६ ॥

तमतिक्रम्य लक्ष्मीवान्समुद्रे शतयोजने ।
गिरिः पुष्पितको नाम सिद्धचारणसेवितः ॥ २७ ॥

चन्द्रसूर्यांशुसङ्काशः सागराम्बुसमावृतः ।
भ्राजते विपुलैः शृङ्गैरम्बरं विलिखन्निव ॥ २८ ॥

तस्यैकं काञ्चनं शृङ्गं सेवते यं दिवाकरः ।
श्वेतं राजतमेकं च सेवते यं निशाकरः ॥ २९ ॥

न तं कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ।
प्रणम्य शिरसा शैलं तं विमार्गत वानराः ॥ ३० ॥

तमतिक्रम्य दुर्धर्षाः सूर्यवान्नाम पर्वतः ।
अध्वना दुर्विगाहेन योजनानि चतुर्दश ॥ ३१ ॥

ततस्तमप्यतिक्रम्य वैद्युतो नाम पर्वतः ।
सर्वकामफलैर्वृक्षैः सर्वकालमनोहरैः ॥ ३२ ॥

तत्र भुक्त्वा वरार्हाणि मूलानि च फलानि च ।
मधूनि पीत्वा मुख्यानि परं गच्छत वानराः ॥ ३३ ॥

तत्र नेत्रमनःकान्तः कुञ्जरो नाम पर्वतः ।
अगस्त्यभवनं यत्र निर्मितं विश्वकर्मणा ॥ ३४ ॥

तत्र योजनविस्तारमुच्छ्रितं दशयोजनम् ।
शरणं काञ्चनं दिव्यं नानारत्नविभूषितम् ॥ ३५ ॥

तत्र भोगवती नाम सर्पाणामालयः पुरी ।
विशालरथ्या दुर्धर्षा सर्वतः परिरक्षिता ।
रक्षिता पन्नगैर्घोरैस्तीक्ष्णदंष्ट्रैर्महाविषैः ॥ ३६ ॥

सर्पराजो महाघोरो यस्यां वसति वासुकिः ।
निर्याय मार्गितव्या च सा च भोगवती पुरी ॥ ३७ ॥

तं च देशमतिक्रम्य महानृषभसंस्थितः ।
सर्वरत्नमयः श्रीमानृषभो नाम पर्वतः ॥ ३८ ॥

गोशीर्षकं पद्मकं च हरिश्यामं च चन्दनम् ।
दिव्यमुत्पद्यते यत्र तच्चैवाग्निसमप्रभम् ॥ ३९ ॥

न तु तच्चन्दनं दृष्ट्वा स्प्रष्टव्यं च कदा चन ।
रोहिता नाम गन्धर्वा घोरा रक्षन्ति तद्वनम् ॥ ४० ॥

तत्र गन्धर्वपतयः पञ्चसूर्यसमप्रभाः ।
शैलूषो ग्रामणीर्भिक्षुः शुभ्रो बभ्रुस्तथैव च ॥ ४१ ॥

अन्ते पृथिव्या दुर्धर्षास्तत्र स्वर्गजितः स्थिताः ।
ततः परं न वः सेव्यः पितृलोकः सुदारुणः ।
राजधानी यमस्यैषा कष्टेन तमसावृता ॥ ४२ ॥

एतावदेव युष्माभिर्वीरा वानरपुङ्गवाः ।
शक्यं विचेतुं गन्तुं वा नातो गतिमतां गतिः ॥ ४३ ॥

सर्वमेतत्समालोक्य यच्चान्यदपि दृश्यते ।
गतिं विदित्वा वैदेह्याः संनिवर्तितमर्हथ ॥ ४४ ॥

यस्तु मासान्निवृत्तोऽग्रे दृष्टा सीतेति वक्ष्यति ।
मत्तुल्यविभवो भोगैः सुखं स विहरिष्यति ॥ ४५ ॥

ततः प्रियतरो नास्ति मम प्राणाद्विशेषतः ।
कृतापराधो बहुशो मम बन्धुर्भविष्यति ॥ ४६ ॥

अमितबलपराक्रमा भवन्तो
विपुलगुणेषु कुलेषु च प्रसूताः ।
मनुजपतिसुतां यथा लभध्वं
तदधिगुणं पुरुषार्थमारभध्वम् ॥ ४७ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com